अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।

निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ २.३६ ॥

avācyavādāṁśca bahūnvadiṣyanti tavāhitāḥ |
nindantastava sāmarthyaṁ tato duḥkhataraṁ nu kim || 2.36||

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्श्यसे महीम् ।

तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ २.३७ ॥

hato vā prāpsyasi svargaṁ jitvā vā bhokśyase mahīm |
tasmāduttiṣṭha kaunteya yuddhāya kṛtaniścayaḥ || 2.37||

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ २.३८ ॥

sukhaduḥkhe same kṛtvā lābhālābhau jayājayau |
tato yuddhāya yujyasva naivaṁ pāpamavāpsyasi || 2.38||

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।

बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ २.३९ ॥

eṣā te'bhihitā sāṅkhye buddhiryoge tvimāṁ śṛṇu |
buddhyā yukto yayā pārtha karmabandhaṁ prahāsyasi || 2.39||

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ २.४० ॥

nehābhikramanāśo'sti pratyavāyo na vidyate |
svalpamapyasya dharmasya trāyate mahato bhayāt || 2.40||